# Vaidika Ārati

## वैदिक आरति

ॐ राजाधिराजाय प्रसह्यसाहिने ॥ नमो वयं वैश्रवणाय कुर्महे ॥
स मे कामान्कामकामाय मह्यम् ॥ कामेश्वरो वैश्रवणो ददातु ॥
कुबेराय वैश्रवणाय ॥ महाराजाय नमः ॥

**Om rājādhirājāya prasahyasāhine ॥**
**namo vayaṁ vaiśravaṇāya kurmahe ॥**
**sa me kāmānkāmakāmāya mahyam ॥**
**kāmeśvaro vaiśravaṇo dadātu ॥**
**kuberāya vaiśravaṇāya ॥ mahārājāya namaḥ ॥**

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ॥

**Om na karmaṇā na prajayā dhanena**
**tyāgenaike amṛtatvamānaśuḥ |**
**pareṇa nākaṁ nihitaṁ guhāyāṁ**
**vibhrājadetadyatayo viśanti ||**

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यास योगाद्यतयश्शुद्धसत्वाः ।
ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥

**vedāntavijñānasuniścitārthāḥ**
**sannyāsa yogādyatayaśśuddhasatvāḥ ।**
**te brahmaloketu parāntakāle**
**parāmṛtātparimucyanti sarve ।।**

दह्रं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसग्गस्थम् ।
तत्रापि दह्रं गगनं विशोकः तस्मिन् यदन्तस्तदुपासितव्यम् ॥

**dahraṁ vipāpaṁ Parame'śmabhūtaṁ**
**yatpuṇḍarīkaṁ puramadhyasaggastham ।**
**tatrāpi dahraṁ gaganaṁ viśokaḥ**
**tasmin yadantastadupāsitavyam ।।**

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

**yo vedādau svaraḥ prokto vedānte ca pratiṣṭhitaḥ ।**
**tasya prakṛtilīnasya yaḥ parassa Maheśvaraḥ ।।**

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

**na tatra sūryo bhāti na candratārakaṁ**
**nemā vidyuto bhānti kuto'yamagniḥ ।**
**tameva bhāntamanubhāti sarvaṁ**
**tasya bhāsā sarvamidaṁ vibhāti ।।**